# Shri Gauranga pratyanga Varnanakhya Stavarajah

# श्रीगौराङ्गप्रत्यङ्गवर्णनाख्यस्तवराजः

## Document Information

Text title : Sri Gauranga-pratyanga-varnana-stava-raja

File name : gaurangapratyangavarNanAkyastavarAjaH.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Transliterated by : NA

Proofread by : NA

Latest update : February 27, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 27, 2021

*sanskritdocuments.org*

# श्रीगौराङ्गप्रत्यङ्गवर्णनाख्यस्तवराजः

अथ स्तोत्रं प्रवक्ष्यामि प्रत्यङ्ग-वर्णनं प्रभोः ।
त्रि-कालं पठनाद्-एव प्रेम-भक्तिं लभेन्नरः ॥ १॥

कश्चिच्छ्री-कृष्ण-चैतन्य-स्मरणाकुल-मानसः ।
पुलकावचिताङ्गोऽपि सकम्पाश्रु-विलोचनः ॥ २॥

कथञ्चित् स्थैर्यमालम्ब्य प्रणम्य गुरुमादरात् ।
स्तोतुमारब्धवान्भक्त्या द्विज-चन्द्रं महाप्रभुम् ॥ ३॥

तप्त-हेम-द्युतिं वन्दे कलि-कृष्णं जगद्गुरुम् ।
चारु-दीर्घ-तनुं श्रीमच्छची-हृदय-नन्दनम् ॥ ४॥

लसन्मुक्तालतानद्ध-चारु-कुञ्चित-कुन्तलम् ।
शिखण्डाक्षत-गन्धाढ्य पुष्प-गुच्छावतंसकम् ॥ ५॥

अर्ध-चन्द्रोल्लसद्भाल-कस्तूरी-तिलकाङ्कितम् ।
भङ्गुर-भ्रू-लता-केलि-जित-काम-शरासनम् ॥ ६॥

प्रेम-प्रवाह-मधुर-रक्तोत्पल-विलोचनम् ।
तिल-प्रसून-सुस्निग्ध-नूतनायत-नासिकम् ॥ ७॥

श्री-गण्ड-मण्डलोल्लासि-रत्न-कुण्डल-मण्डितम् ।
सव्य-कर्ण-सुविन्यस्त-स्फुरच्चारु-शिखण्डकम् ॥ ८॥

मधुर-स्मित-सुस्निग्ध-प्रारक्ताधर-पल्लवम् ।
ईषद्दन्तुरित-स्निग्ध-स्फुरन्-मुक्ता-रदोज्ज्वलम् ॥ ९॥

स-प्रेम-मधुरालाप-वशीकृत-जगज्-जनम् ।
त्रिकोण-चिबुकं कोटि-शरदिन्दु-प्रभाननम् ॥ १०॥

सिंह-ग्रीवं महा-मत्त-द्विरदोल्लासि-कन्धरम् ।
आरक्त-रेखा-त्रय-युक्-कम्बु-कण्ठ-मनोहरम् ॥ ११॥

मुक्ता प्रबाल-कलित-हारोज्ज्वलित-वक्षसम् ।
कङ्कणाङ्गद-विद्योति-जानु-लम्बित-भुज-द्वयम् ॥ १२॥

यव-चक्राङ्कितारक्त-श्रीमत्-पाणि-तलोज्ज्वलम् ।
स्वर्ण-मुद्रालसच्छ्रीमद्विमलाङ्गुलि-पल्लवम् ॥ १३॥

चन्दनागुरु-सुस्निग्धं पुलकावलि-चर्चितम् ।
चारुनाभिलसन्मध्यं सिंह-मध्य-कृशोदरम् ॥ १४॥

विचित्र-चित्र-वसन-मध्य-बन्धोल्लसद्वलिम् ।
सुचारु-नूपुरोल्लासि-कूजच्चरण-पल्लवम् ॥ १५॥

शरच्चन्द्र-प्रतीकाशनखराजत्-पदाङ्गुलिम् ।
अङ्कुश-ध्वज-वज्रादि-लसत्-तल-पदाम्बुजम् ॥ १६॥

कोटि-सूर्य-प्रतीकाशं कोटीन्दु-ललित-द्युतिम् ।
कोटि-कन्दर्प-लावण्यं कोटि-लीला-मनोरमम् ॥ १७॥

साक्षाल्लीला-तनुं केलि-तनुं शृङ्गार-विग्रहम् ।
क्वचिद्भाव-कला-मूर्तिं प्रस्फुरत्-प्रेम-विग्रहम् ॥ १८॥

नामात्मकं नाम-तनुं परमानन्द-विग्रहम् ।
भक्त्यात्मकं भक्ति-तनुं भक्त्याचार-विहारिणम् ॥ १९॥

अशेष-केलि-लावण्यं लीला-ताण्डव-पण्डितम् ।
शची-जठर-रत्नाब्धि-समुद्भूत-सुधा-निधिम् ॥ २०॥

अशेष-जगदानन्द-कन्दमद्भुत-मङ्गलम् ।
स्फुरद्भास-रसावेश-मदालस-विलोचनम् ॥ २१॥

क्वचिद्भक्त-जनैर्दिव्य-माल्य-गन्धानुलेपनैः ।
वेष्टितं रस-सङ्गीतं गायद्भी रस-लालसम् ॥ २२॥

क्वचिद् बाल्य-रसावेश-गङ्गा-तीरे विहारिणम् ।
क्वचिद् गायति गायन्तं नृत्यन्तं कर-शब्दितैः ॥ २३॥

वदन्तं शब्दमत्युच्चैः कुर्वन्तं सिंह-विक्रमम् ।
क्वचिद् आस्फोट-हुङ्कार-कम्पिताशेष-भूतलम् ॥ २४॥

सुगुप्त-गोपिका-भाव-प्रकाशित-जगत्-त्रयम् ।
प्रापिताशेष-पुरुष-स्त्री-स्वभावमनाकुलम् ॥ २५॥

निज-भाव-रसास्वाद-विवशैकादशेन्द्रियम् ।
विदग्ध-नागरी-भाव-कला-केलि-मनोरमम् ॥ २६ ॥

गदाधर-प्रेम-भाव-कलाक्रान्त-मनोरथम् ।
नरहरि-प्रेम-रसास्वाद-विह्वल-मानसम् ॥ २७॥

सर्व-भागवताहूत-कान्ताभाव-प्रकाशकम् ।
प्रेम-प्रदान-ललित-द्विभुजं भक्त-वत्सलम् ॥ २८॥

प्रेमाख्य-पद-द्वन्द्वं श्री-प्रेम-भक्ति-मन्दिरम् ।
निज-भाव-रसोल्लास-मुग्धी-कृत-जगत्-त्रयम् ॥ २९॥

स्व-नाम-जप-सङ्ख्याभिर्वैष्णवी-कृत-भूतलम् ।
नवद्वीप-जनानन्दं भूदेव-जन-मङ्गलम् ॥ ३०॥

अशेष-जीव-सद्भाग्य-क्रम-सम्भूत-सत्-फलम् ।
भयानुराग-सुस्नेह-भक्ति-गम्य-पदाम्बुजम् ॥ ३१॥

नटराज-शिरोरत्नं श्री-नागर-शिरोमणिम् ।
अशेष-रसिक-स्फूर्यन्-मौलि-भूषण-भूषणम् ॥ ३२॥

रसिकानुगत-स्निग्ध-वदनाब्ज-मधु-व्रतम् ।
श्रीमद्द्विज-कुलोत्तंसं नवद्वीप-विभूषणम् ॥ ३३॥

प्रेम-भक्ति-रसोन्मत्ताद्वैत-सेव्य-पदाम्बुजम् ।
नित्यानन्द-प्रियतमं सर्व-भक्त-मनोरथम् ॥ ३४॥

भक्ताराध्यं भक्ति-साध्यं भक्त-रूपिणमीश्वरम् ।
श्रीनिवासादि-भक्ताग्रैः स्तूयमानं मुहुर्मुहुः ।
सार्वभौमादिभिर्वेद-शास्त्रागम-विशारदैः ॥ ३५॥

य एवं चिन्तयेद् देव-देवेशं प्रयतोऽनिशम् ।
संस्तौति भक्ति-भावेन त्रिसन्ध्यं नित्यमेव च ॥ ३६॥

धर्मार्थी लभते धर्मं श्री-भागवतमुत्तमम् ।
अर्थार्थी लभते चार्थं कृष्ण-सेवा-विधौ रतिम् ॥ ३७॥

कामार्थी लभते कामं प्रेम-भक्ति-विधानतः ।
संसार-वासना-मुक्तिं मोक्षार्थी विगत-स्पृहः ॥ ३८॥

विद्यार्थी लभते विद्यां काम-संसार-कृन्तनीम् ।
काव्यार्थी कविता-शक्तिं कृष्ण-वर्णन-शालिनीम् ॥ ३९॥

अपुत्रो वैष्णवं पुत्रं लभते लोक-वन्दितम् ।
आश्रयार्थी लभेच्छान्तं श्रीमद्भागवतं गुरुम् ॥ ४०॥

श्रीमच्छ्री-कृष्ण-चैतन्य-पादाम्बुजे भृशम् ।
प्रेमानुराग-ललितां सद्भक्तिं लभते नरः ॥ ४१॥

इति श्रीलावधूताभिन्न-श्रीमद्-अद्वैताचार्य-प्रभु-विरचितं
श्री-गौराङ्ग-प्रत्यङ्ग-वर्णनाख्य-स्तव-राजः समाप्तः ।

Though this work is attributed to Advaita Acharya in the colophon, it is in fact the fifth chapter of Bhakti-candrikA by Lokananda Acharya of Srikhanda, approximately a century after Advaita as death.

*Shri Gauranga pratyanga Varnanakhya Stavarajah*
pdf was typeset on February 27, 2021

Please send corrections to *sanskrit@cheerful.com*